नदयो वर्षन्तु पर्जन्याः। सुपिप्पला ओषधयो
भवन्तु। अन्नवतामोद नव तामामिक्षवताम् ।
एषा ँ राजा भूयासम् । प्रजापते
न त्वदेतान्यन्यो विश्वा जातानि परिता
बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु
वयँ स्याम पतयो रयीणाम् ॥

[३५] **ओं।** सप्रथ सभां मे गोपाय । ये च
सभ्यास्सभासदः। तानिन्द्रियावतः कुरु।
सर्वमायुरुपासताम् । अहे बुद्ध्नियमन्त्रं मे
गोपय। यमृषयस्त्रैविदा विदुः। ऋचस्सामानि
यजूँषि । सा हि श्री रमृता सताम् । यो वै

तां ब्रह्मणो वेद । अमृतेनावृतां पुरीं । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः ॥

[३६] **ओं ।** यस्सु शृङ्ग स्सुवृषभः। कल्याणो द्रोण आहितः। कार्षी वलप्रगाणेन। वृषभेण यजामहे। वृषभेण यजमानाः। अक्रूरेणेव सर्पिषा। मृधश्च सर्वा इन्द्रेण। पृतनाश्च जयामसि । यस्यायमृषभो हविः॥

[३७] **ओं ।** पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पती नामेण्यन्हे कृष्णो रात्रियै पिकः खिव्वङ्का नीलशीर्ष्णी तेऽर्यम्णे धातुः कत्कटः॥

[३८] **ओं ।** अश्वश्चतुस्त्रि॒ꣳश॒ः। प्रा॒जा॒प॒त्यो वा अश्वः।
प्र॒जाप॑तिश्चतु स्त्रि॒ꣳशो दे॒वता॑नाम्। याव॑ती
रे॒व दे॒वताः॥

[३९] **ओं ।** म॒युः प्रा॑जा॒पत्य ऊ॒लो हली॑क्ष्णो वृषद॒ꣳ
शस्ते धा॒तुस्सर॑स्वत्यै॒ शारि॑ श्श॒येता
पु॑रु॒षवाक्सर॑स्वते॒ शु॑कश्श॒येतः पुरु॑ष॒वागार॒ण्यो॑जो
न॑कु॒लश्शका॒ ते पौ॒ष्णा वा॒चेक्रौ॒ञ्चः॥

[४०] **ओं ।** सि॒ꣳह॒स्य लोम॒ त्विषि॑रिन्द्रि॒याणि ।
अङ्गा॑न्य॒ात्मन् भि॒षजा॒ तद॒श्विना॑ । आ॒त्मान॒मं
गौ॒स्सम॑धा॒त् सर॑स्वती । इन्द्रस्यरू॒पꣳ
शत॒मा॑न॒मा॑युः॥

[४१] **ओं।** सिꣳहे व्याघ्र उत या पृदाकौ। त्विषिरग्नौ ब्राह्मणे सूर्येया। इन्द्रं या देवी सुभगा जजान। सान आगन्वर्चसा संविदाना। या राजन्ये दुन्दुभावाय तायाम्। अश्वस्यक्रन्द्ये पुरुषस्य मायौ। इन्द्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना॥

[४२] **ओं।** नहिशेकुमिव महा मेरुङ्गन्तुम्। अपश्यमहमेत त्सूर्यमण्डलं परिवर्तमानम्। गार्ग्यः प्राणत्रातः। गच्छन्तमहा मेरुम्॥

[४३] **ओं।** अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देव मिन्द्रियं। इदमासां विचक्षणं। हविरासं

जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः।
यस्येमा विश्वा भुवनानि सर्वा । सकृत्तिकाभि
रभिसंवसानः। अग्निर्नो देवस्सुविते दधातु।।

[४४] **ओं ।** पुण्यन्नक्षत्रमभिर्संविशाम। मानो
अरातिरधश ७ सागन्न्। क्षत्रस्य राजावरुणोधि
राजः। नक्षत्राणा७शतभिषग्वसिष्टः। तौदेवेभ्यः
कृणुतोदीर्घमायुः ।।

[४५] **ओं ।** हिरण्य पात्रं मधोः पूर्णं ददाति ।
मधव्योसानीति । एकधा ब्रह्मण उपहरति ।
एकधैव यजमान आयुस्तेजो दधाति ।।

[४६] **ओं ।** दशहूतो ह्वै नामैषः। तं वा एतं दशहूत॒ँ
सन्तम् । दशहोतेत्याचक्षते परोक्षेण ।
परोक्ष प्रिया इव हि देवाः ॥

[४७] **ओं ।** तस्मै सप्तमँहूतः प्रत्यशृणोत् ।
ससप्तहूतोऽभवत् । सप्त हूतो ह्वै नामैषः।
तं वा एतं सप्त हतँ सन्तम् ।
सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया
इव हिदेवाः॥

[४८] **ओं ।** षड्ढूतो ह्वै नामैषः। तं वा एतँषड्ढूतँ
सन्तम् । षड्ढोतेत्या चक्षते परोक्षेण।
परोक्षप्रिया इव हि देवाः ।

[४९] **ओं ।** पञ्चहूतो हवै नामैषः। तं वा एतं पञ्च
हूतᳬ सन्तम्। पञ्चहोतेत्याचक्षते परोक्षेण।
परोक्ष प्रिया इव हि देवाः ॥

[५०] **ओं ।** चतुर्हूतो हवै नामैषः। तं वा एतं
चतुर्हूतᳬ सन्तम् । चतुर्होतेत्या चक्षते
परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

[५१] **ओं ।** सर्व स्याप्त्यै सर्वस्य जित्यै सर्व मेव
तेनाप्नोति सर्वं जयति ॥

[५२] **ओं ।** न तत्र सूर्यो भाति न चन्द्रतारकं नेमा
विद्युतो भान्ति कुतोयमग्निः। तमेव भान्तमनु
भाति सर्वं तस्य भासा सर्वमिदं विभाति ॥

[५३] **ओं ।** बृहत्साम क्षत्रभृद्वृद्ध वृष्णियं । त्रिष्टु
भौज श्शुभितमुग्रवीरम्। इन्द्र स्तोमेन पञ्च
दशेन मध्यमिदं वातेन सगरेण रक्ष ।।

[५४] **ओं ।** चन्द्रमा मनसो जातः। चक्षोस्सूर्यो
अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ।।

[५५] **ओं ।** दूरमस्मच्छत्रवो यन्तु भीताः। तदिन्द्राग्नी
कृणुतां तद्विशाखे । तन्नो देवा अनुमदन्तु
यज्ञं । पश्चात्पुरस्तादभयन्नो अस्तु ।।

[५६] **ओं ।** राजाधिराजाय प्रसह्यसाहिने । नमो
वयं वै श्रवणाय कुर्महे । समे कामांकामकामाय
मह्यं । कामेश्वरो वै श्रवणो ददातु । कुबेराय
वै श्रवणाय । महाराजाय नमः।।

[५७] **ओं ।** यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन् । तेह नाकं महिमा नस्सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः॥

[५८] **ओं ।** केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भि रजायथाः॥

[५९] **ओं ।** वायुस्ता॒अग्रे प्रमुमोक्तु देवः। प्रजापतिः प्रजया संविदानः। प्रमुञ्चमाना भुवनस्य रेतो गातुं धत्त यजमानाय देवाः।

[६०] **ओं ।** सोमो वा एतस्य राज्यमादत्ते । यो राजासन् राज्योवा सोमेन यजते । देव सुवा मेतानि हवी॒षि भवन्ति । एतावन्तो वै देवाना ॒सवाः । त एवास्मै सवान् प्रयच्छन्ति ।

त एनं पुनस्सुवन्ते राज्याया देव सूराजा भवति ॥

[६१] **ओं ।** बहुग्वै बह्वश्वायै बह्वजाविकायै । बहु व्रीहिय वायै बहु माष तिलायै । बहु हिरण्यायै बहुहस्तिकायै । बहु दास पूरुषायै रयिमत्यै पुष्टि मत्यै । बहुरायस्पोषायै राजास्तु ।

[६२] **ओं ।** प्रमुञ्च धन्वनस्त्वमुभयो रार्त्नि योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥

[६३] **ओं ।** सक्तुमिव तितऊना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायस्स ख्यानिजान ते भद्रैषं लक्ष्मीर्निहिताधि वाचि ॥